# शिक्षा–निदेशालयः राष्ट्रिय–राजधानी–क्षेत्रम्, देहली–सर्वकारः

## वार्षिक–अभ्यासप्रश्नपत्रम्– 2025-26

## कक्षा- नवमी– संस्कृतम्

**समयः होरात्रयम्** **सम्पूर्णाङ्काः- 80**

**सामान्यनिर्देशाः –**

उत्तरलेखनात्पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
प्रश्नसंख्या प्रश्नपत्रानुसारम् एव लेखनीया।
सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

**अपठितावबोधनम्**

1 **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।** **10**

प्राचीनकाले भारतवर्षे गुरुकुलव्यवस्था आसीत्। तत्र छात्राः गुरोः समीपे निवसन्तः शिक्षां प्राप्नुवन्ति स्म। तेषां जीवनं अत्यन्तं सरलम् आसीत्। ते प्रातःकाले एव उत्थाय स्नानं कृत्वा यज्ञशालां यज्ञं कृत्वा गुरोः आज्ञां गृह्णन्ति स्म। तत्र ते वेदान्, गणितं, व्याकरणं, आयुर्वेदं च अधीयन्ते स्म। भोजनं सर्वे मिलित्वा कुर्वन्ति स्म, तथा एव रात्रौ कथाश्रवणं भवति स्म।
गुरुकुले सर्वे छात्राः समानाः आसन् — न तत्र धनवान् दरिद्रः वा भेदः आसीत्। गुरुः शिष्येषु मातृवत् स्नेहम् आचरति स्म, शिष्याश्च गुरौ पितृवत् श्रद्धां वहन्ति स्म। एषा परम्परा भारतीयसंस्कृतेः मेरुदण्डः आसीत्।

**(अ) एकपदेन लिखत– (केवलं प्रश्नद्वयम्)**

i. 'प्राचीनकाले भारतवर्षे का व्यवस्था आसीत्? **2x1=2**
ii. छात्राः गुरोः समीपे निवसन्तः कां प्राप्नुवन्ति स्म?
iii. गुरुः शिष्येषु कीदृशं स्नेहम् आचरति स्म?

**2x2=4**

**(आ) पूर्णवाक्येन लिखत– (केवलं प्रश्नद्वयम्)**

i. छात्राः प्रातःकाले उत्थाय स्नानं कृत्वा किं कुर्वन्ति स्म?
ii. छात्राः गुरुकुले किम् अधीयन्ते स्म?
iii. रात्रौ किं भवति स्म?

**(इ) अस्य अनुच्छेदस्य कृते उचितं शीर्षकं संस्कृतेन लिखत–** **1x1=1**

**(ई) यथानिर्देशम् उत्तरत–** **3x1=3**

i. 'शिक्षकस्य' पदस्य किं समानार्थकं पदं गद्यांशे प्रयुक्तम्?

ii. 'तेषां जीवनं अत्यन्तं सरलम् आसीत्।' अत्र तेषाम् इति सर्वनामपदं कस्मै प्रयुक्तम्?

iii. 'धनवान् दरिद्रः वा भेदः आसीत्' अस्मिन् वाक्ये किम् अव्ययपदं प्रयुक्तम्?

## रचनात्मकं कार्यम् 15 अङ्काः

**2 अधोलिखितं पत्रं मञ्जूषापदसहायतया पूरयित्वा पुनः लिखत-** **5**

भवान् नितिनः। भवतः विद्यालये 'विद्यालये स्वच्छतायाः महत्वम्' विषयमधिकृत्य एकस्याः प्रतियोगितायाः आयोजनम् अभवत्, इति सूचयन्तं मञ्जूषायां दत्तानां पदानां सहायतया पितरं प्रति पत्रं लिखतु।

**मञ्जूषा**

बालकानां, मशकाः,पर्यावरणं , तत्रास्तु, महत्वं, प्रणमामि, स्वच्छता, छात्राः, निवेदनीयाः, दृष्ट्वा, उत्तमस्वास्थ्याय, पञ्चदश आयुवर्गात्, विद्यालये, प्राध्यापिका, विद्यालये, अभ्यासः

**अथवा**

भवान् महेशः अस्ति। भवतः मित्रं विवान् अस्ति । तस्य जन्मदिनम् अग्रिमे मासे आगच्छति। भवान् 'मित्राय जन्मदिनस्य वर्धापनानि समर्पणाय मञ्जूषायां दत्तानां पदानां सहायतया एकं पत्रं लिखन्तु।

**मञ्जूषा**

मित्रम् , चिरञ्जीवी, आयुष्मान्, शिक्षकाः, छात्राः, विद्यालयः, पठन्ति, उन्नतिं, यशः, स्वास्थ्यलाभः, हितकरं, पित्रोः, यशःवर्धनं, विद्या, आजीविका

**3. प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत-** **5x1=5**



**मञ्जूषा**

| |
|---|
| पश्यति, भवनम्, उत्पतन्ति, पादपः, उद्यानम्, एकः वृक्षः, नभसि, परोपकाराय, सन्ति, पुरतः, जनः, शिक्षकः, सुखदा, निर्मला वायुः, रम्यं, दृश्यम्, विद्यालयः, छात्रः गृहं, प्राणवायुः, मातुः नाम |

**अथवा**

**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत।**

**पिककाकयोः साम्यम्**

| |
|---|
| काकः, कृष्णवर्णः, अन्नं, मांसं च, शिशोः हस्तात्, रोटिका, आच्छिद्य, कपोतः, वसन्तसमये, नीडे, कोकिलः, शावकान्, उड्डीयते, चटका, भक्षयति, पिबति, आनयति, रवः, कटुः पिकः, परिश्रमी, प्रस्तरान्, जलं, घटः, स्थापयति, , निवसति |

**4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत।** **5x1=5**

1. मैं प्रतिदिन विद्यालय जाता हूँ। I go to school every day.
2. हमारे गुरु बहुत विद्वान् हैं। Our teacher is very learned.
3. बच्चे बगीचे में फूल लगाते हैं। The children plant flowers in the garden.
4. मेरा मित्र पुस्तक से अध्ययन करता है। My friend studies with a book.
5. हम पर्यावरण की रक्षा करते हैं। We protect the environment.

'ग'-खण्डः 25 अङ्काः

## अनुप्रयुक्त-व्याकरणम्

**5.** अ **अधोलिखितेषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा लिखत** **4x1=4**

i.) वसन्ते **लसन्तीह** सरसा रसाला।

ii.) वृक्षा **लताः+च** फलानि पुष्पाणि समुपहरन्ति।

iii.) सूर्योदयात् पूर्वमेव सा **तत्रोपस्थिता**।

iv.) सा तदा **करुणावाचो विलपन्ती** सुदुःखिता।

अथवा

आ **अधोलिखितेषु रेखांकितपदेषु सन्धिं सन्धिच्छेदं वा लिखत**

i.) तं शब्दम् **अवसुप्तः+तु** जटायुरथ शुश्रुवे।

ii.) **क्लेश्यमानः+ अपि** विद्यां नाधीतवान्।

iii.) गृहम् **उपैति** तदपि वरम्।

iv.) सः **पुष्प+उद्यानं** व्रजन्तं मधुकरम् आह्वयत्।

**6. प्रदत्तविकल्पेभ्यः उचितशब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत–** **4x1=4**

**i.)** रमेशः**……………………**कथां पठति।

(क) पुस्तकेन (ख) पुस्तकाय (ग) पुस्तकं (घ) पुस्तकात्

**(ii)** मोहनः मम **……………………** पुत्रम् अस्ति।

(क) मित्रस्य (ख) मित्रेण (ग) मित्रं (घ) मित्राय

**(iii)** **……………………**एकः भयंकरः व्याघ्रः निवसति स्म।

(क) वने (ख) वनेन (ग) वनाय (घ) वनात्

**(iv)** रजतः मम **……………………**पठति।

(क) कक्षां (ख) कक्षायां (ग) कक्षायाः (घ) कक्षायै

**7. उचितलकारं प्रयुज्य क्रियापदैः वाक्यानि पूरयत -** **4x1=4**

**(i)** भगिनी संयावं **……………………**।

(क) पचसि (ख) पचन्ति (ग) पचति (घ) पचामः

**(ii)** मम माता विदुषी **……………………**।

(क) अस्मि (ख) अस्ति (ग) स्तः (घ) सन्ति

**(iii)** तानि आम्राणि मधुराणि **……………………**।

(क) सन्ति (ख) अस्ति (ग) आसीत् (घ) स्तः

**(iv)** सुमित्रां रीतां स्वविवाहे आगमनाय…………………… ।

(क) आमन्त्रयन्ति  (ख) आमन्त्रयति (ग) आमन्त्रयतः  (घ) आमन्त्रयसि

**8. कारक–उपपदविभक्तिम् आश्रित्य विकल्पेभ्यः उचितपदानि चिनुत।        4x1=4**

(i)  घनश्यामः …………………… इतिहासं पठति।

(क) चित्रफलकस्य   (ख) चित्रफलकं  (ग) चित्रफलकात् (घ) चित्रफलकाय

(ii) मनसुखः  …………………… धनं ददाति।

(क) याचिकायै  (ख)    (ग) याचिकायाः   (घ) याचिकां

(iii) चिकित्सालयं निकषा मम ……………………अस्ति।

(क) विद्यालयं (ख) विद्यालयाय  (ग) विद्यालयः (घ) विद्यालयेन

(iv) छात्राः  ……………… गृहम् आगच्छन्ति।

(क) पुस्तकालयात् (ख) पुस्तकालयं (ग) पुस्तकालयेन (घ) पुस्तकालयस्य

**9. रेखाङ्कितपदेषु प्रकृतिप्रत्ययौ संयोज्य विभज्य वा विकल्पेभ्यः समुचितं उत्तरं लिखत -          3x1=3**

(i)   धर्मस्यैव अङ्गमिति ऋषयः **<u>प्रतिपादितवन्तः</u>**।

(क) प्रतिपाद+ क्त (ख) प्रतिपाद+ क्तवतु    (ग) प्रतिपाद+ तव्यत्  (घ) प्रतिपाद+ अनीयर्

**(ii)** तव **<u>आकर्ण्य</u>** वीणामदीनां नदीनाम्।

(क) आकृ+क्यप्  (ख) आकृ+क्यच्  (ग) आकृ+ल्यप्  (घ) आकृ+क्यष्

**(iii)** तं **<u>क्रीड्+तुमुन्</u>** द्वित्रिवारम् आह्वयत्।

(क) क्रीडितुम् (ख) क्रीडितुमुन्  (ग) क्रीडिते (घ) क्रीडितः

**10. अङ्कानां स्थाने उचितसंख्यापदानि संस्कृतभाषया लिखत –  4x½=2**

**(i)** उद्याने **(93)** आम्रवृक्षाः सन्ति।

**(ii)** विद्यालये **(46)** शिक्षकाः सन्ति।

**(iii)**  मम कक्षायां **(38)** छात्राः सन्ति।

**(iv)** पुस्तकालये सम्प्रति **(67)** छात्राः अध्ययनरताः सन्ति।

**11. अधोलिखितपदेषु उपसर्गं संयोज्य विभज्य वा लिखत-** **4x½=2**

**(i)** निवारयन्ती ……………..+……………….

**(ii)** प्रहारेण ……………..……………….

**(iii)** परिधानैः ……………..+……………….

**(iv)** प्र+वृत्तः ……………..……………….

**12. कोष्ठकेभ्यः शुद्धम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयत-** **2x1=2**

(i) प्रहर्षिता बालिका निद्रामपि ……. लेभे।

(ii) दिवसे मार्गभ्रान्तः सन्ध्यां यावत् …….. गृहमुपैति तदपि वरम्?

**मञ्जूषा**

| |
|---|
| यदि, न |

**'घ'-खण्डः** **30 अङ्काः**

**पठितावबोधनम्**

**13 अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–** **5**

प्रकृतिः समेषां प्राणिनां संरक्षणाय यतते। इयं सर्वान् पुष्णाति विविधैः प्रकारैः, सुखसाधनैः च तर्पयति। पृथिवी, जलम्, तेजः, वायुः, आकाशः च अस्याः प्रमुखाणि तत्त्वानि। तान्येव मिलित्वा पृथक्तया वाऽस्माकं पर्यावरणं रचयन्ति। आव्रियते परितः समन्तात् लोकः अनेन इति पर्यावरणम्। यथा अजातश्शिशुः मातृगर्भे सुरक्षितः तिष्ठति तथैव मानवः पर्यावरणकुक्षौ। परिष्कृतं प्रदूषणरहितं च पर्यावरणम् अस्मभ्यं सांसारिकं जीवनसुखं, सद्विचारं, सत्यसङ्कल्पं माङ्गलिकसामग्रीञ्च प्रददाति । प्रकृतिकोपैः आतङ्कितो जनः किं कर्तुं प्रभवति ? जलप्लावनैः, अग्निभयैः, भूकम्पैः, वात्याचक्रैः, उल्कापातादिभिश्च सन्तप्तस्य मानवस्य क्व मङ्गलम् ?

**क. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)**

(i) प्रकृतेः प्रमुखाणि तत्त्वानि कतिपयानि?

(ii) आव्रियते परितः समन्तात् लोकः अनेन इति कस्य व्युत्पत्तिः? **2x½=1**

(iii) का समेषां प्राणिनां संरक्षणाय यतते।

**ख. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्)** **2x1=2**

(i) प्रकृतिः प्राणिनां किमर्थं यतते?

(ii) परिष्कृतं प्रदूषणरहितं पर्यावरणं अस्मभ्यं किं प्रददाति?

(iii) मानवः कुत्र सुरक्षितः तिष्ठति?

**ग. यथानिर्देशम् उत्तरत (केवलं प्रश्नद्वयम्)** **2x1=2**

(i) 'प्रकृतिः समेषां प्राणिनां संरक्षणाय यतते' अत्र कर्तृपदं किम् अस्ति?

(ii) 'परिष्कृतं प्रदूषणरहितं च पर्यावरणम्' अत्र विशेष्यपदं किम् अस्ति?

(iii) ' इयं सर्वान् पुष्णाति विविधैः प्रकारैः' अत्र इयम् इति सर्वनामपदं कस्मै प्रयुक्तम्?

**14 अधोलिखितं पद्यं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।** **5**

**ततः पर्वतशृङ्गाभस्तीक्ष्णतुण्डः खगोत्तमः।**
**वनस्पतिगतः श्रीमान्व्याजहार शुभां गिरम् ॥**

**क. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)** **2x½=1**

(i) खगोत्तमः कुत्र आसीत्?

(ii) खगोत्तमस्य तुण्डः कीदृशः आसीत्?

(iii) खगोत्तमः कीदृशीं गिरम् उक्तवान्?

**ख. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्)** **2x1=2**

i. खगोत्तमः कस्य उपरि स्थित्वा शुभां गिरं व्याजहार?
ii. नद्यः किं न कुर्वन्ति?
iii. तीक्ष्णतुण्डः कः आसीत्?

**ग. यथानिर्देशम् उत्तरत (केवलं प्रश्नद्वयम्)** **2x1=2**

i. 'पक्षिश्रेष्ठः' इत्यस्य कृते पद्यांशे कि पर्यायपदं प्रयुक्तम्?
ii. पद्ये 'व्याजहार ' इति क्रियापदस्य कर्तृपदं किम् अस्ति
iii. 'तीक्ष्णतुण्डः खगोत्तमः' अत्र किं विशेषणपदं प्रयुक्तम् ?

**प्र.15 अधोलिखितं संवादं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

(ततः प्रविशति तपस्यारतः तपोदत्तः)

तपोवत्तः - अहमस्मि तपोदत्तः।

बाल्ये पितृचरणैः, क्लेश्यमानोऽपि विद्यां नाऽधीतवानस्मि। तस्मात् सर्वैः कुटुम्बिभिः मित्रैः ज्ञातिजनैश्च गर्हितोऽभवम्।

(ऊर्ध्वं निःश्वस्य)

हा विधे। किम् इदं मया कृतम् ? कीदृशी दुर्बुद्धिः आसीत् तदा। एतदपि न चिन्तितं यत्–

परिधानैरलङ्कारैर्भूषितोऽपि न शोभते।
नरो निर्मणिभोगीव सभायां यदि वा गृहे।।

(किञ्चिद् विमृश्य)

भवतु, किम् एतेन? दिवसे मार्गभ्रान्तः सन्ध्यां यावद् यदि गृहमुपैति तदपि वरम्। नाऽसौ भ्रान्तो मन्यते। अतोऽहम् इदानीं तपश्चर्यया विद्यामवाप्तुं प्रवृत्तोऽस्मि।

(जलोच्छलनध्वनिः श्रूयते)

अये कुतोऽयं कल्लोलोच्छलनध्वनिः? महामत्स्यो मकरो वा भवेत्।

पश्यामि तावत्

**क. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)** **2x½=1**

i.) तपस्यारतः कः प्रविशति?

ii.) तपोदत्तः बाल्ये किम् न अधीतवान्?

iii.) कस्याः ध्वनिः श्रूयते?

**ख. पूर्णवाक्येन उत्तरत (केवल प्रश्नद्वयम्)** **2x1=2**

i.) तपोदत्तः कैः गर्हितः अभवत्?

ii.) तपोदत्तः परिधानैरलङ्कारैः भूषितस्य नरस्य विषये किं श्लोकं चिन्तयति?

iii.) सः तपश्चर्यां किमर्थं आरब्धवान्?

**ग.यथानिर्देशम् उत्तरत (केवलं प्रश्नद्वयम्)** **2x1=2**

i.) 'तपस्यारतः तपोदत्तः' अत्र विशेष्यपदं किम् अस्ति?

ii.) 'श्रूयते जलोच्छलनध्वनिः' अत्र क्रियापदं किम् अस्ति?

iii.) ' हा विधे! किम् इदं मया कृतम् ' अत्र मया इति सर्वनामपदं कस्मै प्रयुक्तम्?

**16. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत–** **4x1=4**

i.) एते पक्षिणः **मनुष्येषु** नोपगच्छन्ति।

ii.) **परोपकाराय** सतां विभूतयः।

iii.) **धेनुः** दोग्धुम् अनुमतिम् एव न ददाति।

iv.) अतिशयस्य **अन्नस्य** यः अणिष्ठः तन्मनः।

**17. मञ्जूषातः समुचितानि पदानि चित्वा अधोलिखित–श्लोकस्य अन्वयं पूरयत–** **3**

**पिबन्ति नद्यः स्वयमेव नाम्भः स्वयं न खादन्ति फलानि वृक्षाः।**
**नादन्ति सस्यं खलु वारिवाहाः परोपकाराय सतां विभूतयः।**

**अन्वयः**– नद्यः स्वयमेव (i) ...................... न पिबन्ति, वृक्षाः स्वयं (ii) ...................... न खादन्ति, वारिवाहाः खलु (iii)...................... न आदन्ति। सतां विभूतयः परोपकाराय भवन्ति।

**मञ्जूषा**

| फलानि, अम्भः, सस्यं |
|---|

**अथवा**

**श्लोकस्य भावार्थं मञ्जूषापदसहायतया पूरयित्वा लिखत -**

**लतानां नितान्तं सुमं शान्तिशीलं**
**चलेदुच्छलेत् कान्तसलिलं सलीलम्।**
**तवाकर्ण्य वीणाम् अदीनां नदीनाम्॥**

**भावार्थः-** हे देवि! तव वीणायाः (i) ……………….. श्रुत्वा, लताः स्वभावतः शान्ताश्च, (ii) ……………….. अपि चलन्ति, नद्यः च रम्यं सलिलं लीलया उच्छालयन्ति। तव वीणानादेन समस्ता(iii). ………………... प्रमुदिता भवति।

**मञ्जूषा**

| प्रकृतिः, मन्दं मन्दं, मधुरनिनादं, |
|---|

**18. अधोलिखित- कथांशं यथाक्रमं लिखतु।** **8x½=4**

i.) मया वटद्रुमस्य शाखायां नीड कार्यम्।
ii.) अथ सः पुष्पोद्यानं व्रजन्तं मधुकरं दृष्ट्वा तं क्रीडितुम् द्वित्रिवारम् आह्वयत्।
iii.) एतत् शुष्क तृणं त्यज स्वादून् भक्ष्यकवलान् ते दास्यामि।
iv.) सः मधुकरः अस्य बालस्य आह्वानं तिरस्कृतवान्।
v.) ततो भूयो भूयः हठमाचरति बाले सः मधुकरः अगायत् ।
vi.) अलं भाषणेन अनेन मिध्यागर्वितेन कीटेन।
vii.) "वयं हि मधुसंग्रहव्यग्रा" इति।
viii.) अयि चटकपोत! मानुषस्य मम मित्रं भविष्यसि।

**प्र.19 (क) अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत - 4x½=2**

**(1)** किं पर्यटसि अस्मिन् <u>**निदाघदिवसे**</u>।

(क) शीतदिवसे (ख) ग्रीष्मदिवसे (ग) वृष्टिदिवसे (घ) वसन्तदिवसे

(ii) "मधुर– <u>**मञ्जरी**</u> –पिञ्जरीभूतमालाः।

(क) जम्बुफलम् (ख) आम्रकुसुमम् (ग) आम्रफलम् (घ) आम्रपत्रम्

(iii) येषां **मरालैः** सह विप्रयोगः

(क) हंसैः (ख) मित्रैः (ग) धनैः (घ) जीवनैः

(iv) वृद्धोऽहं युवा **धन्वी** सरथः कवची शरी

(क) धनवान् (ख) धनी (ग) धनुर्धरः (घ) रथी

**(ख) अधोलिखितशब्दानां तेषाम् अर्थैः सह मेलनं कुरुत** **4x½=2**

| **(क)** | **(ख)** |
|---|---|
| (i) बभञ्ज | (क) सज्जनानाम् |
| (ii) कुक्षौ | (ख) शत्रुः |
| (iii) अरिन्दमः | (ग) प्रश्नं कर्तुं |
| (iv) प्रष्टुं | (घ) भग्नं कृतवान् |

**…………..0…………….**